International Journal of Sanskrit Research 2019; 5(5): 68-71

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 68-71
© 2019 IJSR
www.anantaajournal.com
Received: 08-07-2019
Accepted: 12-08-2019

**Avula Priyanka**
Junior Researcher
EFEO, Pondicherry, India

**Correspondence**
**Avula Priyanka**
Junior Researcher
EFEO, Pondicherry, India

# लौकिकन्यायलक्षणानि

**Avula Priyanka**

## प्रस्तावना

लोके शास्त्रेषु च स्वाभिप्रायसमर्थनार्थं वक्तव्यांशं विशदीकर्तुं च ग्रन्थकर्तृभिः तथा शास्त्रकारैश्च बहुविधदृष्टान्ताः परिकल्प्यन्ते। ते च दृष्टान्ताः कदाचित् लोकोक्तिरूपेण, सुभाषित-रूपेण, कथारूपेण, बहुविधान्यरूपैश्च दृश्यन्ते। अत्र लोकोक्तेरेवैकः प्रकारो लौकिकन्यायः। संस्कृतवाङ्मये लौकिकन्यायानामत्यन्तप्राचुर्यं वर्तते। ग्रन्थकारेषु शास्त्रकारेषु च बहवः ग्रन्थ-ग्रथनसमये शास्त्ररचनावसरे च लौकिकन्यायान् प्राकरणि-कौचित्यमनुसृत्य सुलभबोधनार्थम् आश्रयन्ते।।

लौकिकन्यायानां लक्षण-प्रयोजनैतिहासिकचित्राणादिविचारात् पूर्वमस्य शब्दस्य शाब्दिकार्थिकस्वरूप-निरूपणायात्र प्रयत्यते। लौकिकन्यायः इति शब्दो विशेषणपूर्वपदकर्मधारयसमासः। अत्र पदद्वयमस्ति लौकिकः इति न्यायः इति च। लोके विदितः प्रसिद्धः हितः, लोकं वेत्ति वा लौकिकः [1]। "लोकृ दर्शने" इति धातोः [2] "लोकृ भाषायाम्" [3] इत्यस्माद्वा "लोक्यते असौ" इत्यर्थे लोक शब्दो निष्पाद्यते। अयं भुवने, दर्शने, जने चार्थे विद्यते।। लोके विदितः इत्यर्थे "लोकस्सर्वलोकाठ्ठञ्" इति ठञि [4] लौकिकः। लोकव्यवहारप्रसिद्धः इत्यर्थः। अथवा भवार्थे "अध्यात्मादेः ठञिष्यते"(वा) [5] इति ठञि लौकिकः, प्रसिद्धः इत्यर्थः। लोकाय हितम् इत्यर्थे च णिक्- निपूर्वादिण्धातोः परिन्योर्नीणोः द्यूताभ्रेषयोः [6] इत्यभ्रेषविषये न्यायशब्दो निष्पाद्यते तस्य उचितमित्यर्थः।।

---

[1] वा.च

[2] भ्वादिगणे धातुः-७६

[3] चुरादिगणे धातुः -१७७७

[4] पा.सू ५-१-४४

[5] पा.सू ४-३-६०

[6] पा.सू ३-३-३७

नियन्त्यनेनेत्यर्थे "अध्यायन्यायो-द्यावसंहाराश्च इति"[7] प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः। एवमेतयोर्द्वयोश्शब्दयोः समसनेन लौकिकन्यायः इति शब्दस्सिद्ध्यति। इत्थं शाब्दिकस्वरूपं निरूप्येदानीमार्थिकविचारः क्रियते।।

**लौकिकन्यायलक्षणानि**

स्वोक्तिसमर्थनाय प्रमाणान्तरोदाहरणं मानवस्वभावः। वेदेपि कञ्चन विषयं प्रतिपाद्य तत्समर्थनम् "तदप्येषश्लोको भवति" इत्यन्यप्रमाणोदाहरणदानेन स्थिरीक्रियते। जैनबौद्धग्रन्थेषु अपि अत्रेयं गाथा इति यां काञ्चन गाथाम्, आर्या भेदम्, श्लोकान्तरं वा प्रतिपाद्य विषयस्य सुबोधकत्वं साध्यते। एतेन स्वोक्तिसमर्थनाय अथवा वक्तव्यांशस्य विपुलीकरणाय वा मानवेन उपमानप्रयोगः अथवा दृष्टान्तपरिकल्पनं प्राचीनकालादपि वर्तते इति तान्येव दृष्टान्तानि काल-क्रमेण लौकिकन्यायरूपेण परिणतानीति निर्णीयते।। एवं प्रचलितान् लौकिकन्यायानवगन्तुं तेषां लक्षणस्वभावादिकमवश्यं ज्ञातव्यमितीदानीं न्यायानां लक्षणानि संग्रहेण निर्दिश्यन्ते।।

**1. अज्ञातकर्तुत्वम्**

एतेषां लौकिकन्यायानां कर्ता कः? कस्मिन् ग्रन्थे उपनिबद्धाः एते? इत्यादिविषयान् निश्चयेन वक्तुं न शक्नुमः। अज्ञात कालादेव लौकिक-वैदिकवाक्ययोरुभयोरपि बहवो न्यायाः प्रयुक्ताः। एतेषां सङ्क्षापीयत्तया न दृश्यते। यद्यप्यज्ञातकर्तृकाः एते तथापि लोके शास्त्रे च प्रयोगप्राचुर्यात् सार्वजनीनास्सञ्जाताः।।

**2. पण्डितप्रथितत्वम्**

लोकव्यवहारापेक्षया शास्त्रेष्वेवैतेषां न्यायानामुपयोगो दरीदृश्यते। अनेके शास्त्रवेत्तारः स्वग्रथितेषु शास्त्रेषु स्वाभिप्रायसमर्थनाय सुलभबोधनाय च बहून् न्यायान् प्रयुज्य तेषां न्यायानां लोकप्रसिद्धिं न्यगमयन्।। अत एवैते न्यायाः पण्डितप्रथिता एव न तु ग्रथिता इति प्रकटयितुं शक्यते।

**3. परिमाणे लघुत्वम्**

यथौषधिरल्पोपि सेवनेन महान्तं गुणं परिकल्पयति तथैव न्यायोपि परिमाणे लघुः दृश्यते। द्वित्रैः पञ्चशैर्वोपनिबद्धोपि तस्य प्रयोजनं त्वनल्पमेव। बहुदीर्घचर्चयावगन्तुम् अशक्यमपि विषयमयं न्यायस्सुलभतरं स्पष्टीकरोति।।

**4. नियतस्वरूपम्**

यं दृष्टान्तं प्रधानीकृत्य न्यायः कल्प्यते, शास्त्रान्तरेष्वपि स न्यायः तद्दृष्टान्तमेव गृह्णाति। यथा एकदेशविकृतन्यायः बहुशास्त्रेष्वादृतः। सर्वत्रापि छिन्नपुच्छे शुनि पुच्छ-व्यवहारमेव दृष्टान्तं कृत्वा विषयनिर्धारणं क्रियते।।

**5. सार्वकालिकत्वम्**

न्यायः प्रायशस्त्रैकालिकसत्यं विश्वजनीनप्रयोजनसाधकश्च भवति। सर्वेष्वपि कालेषु सदृशसन्दर्भेऽयं प्रयोक्तुं शक्यत इति न्यायः सर्वकालप्रयोगयोग्यः।

**6. अनिश्चित कालिकत्वम्**

न्यायानां कालनिर्णयो न सुसाधो विषयः। कियतः कालादयं न्यायः वाक्ये प्रयुज्यते इति निश्चप्रचं वक्तुं न शक्यते। अतिप्राचीनेष्वपौरुषेयेषु वेदेषु, लौकिकन्यायाः बहुत्रोपन्यस्ताः। तत्रापि उपनिषद्भागेषु सृष्ट्युपक्रमादि विषयेषु, आत्मतत्त्वनिर्धारणे चैतेऽविरलतया प्रयुक्ताः। बृहदारण्यकोपनिषदि अश्मलोष्टन्यायः, प्रश्नोपनिषदि मक्षिकान्यायः, मुण्डकोपनिषदि अन्तर्दीपिकान्यायः इत्येवमेतेषां न्यायानां प्रथमतो वेदेष्वेव दृश्यमानत्वात् एतेषां कालनिर्णयो दुःसाधो भवति। इतरत्र दृश्यमानानामपि कालनिर्णयो न सुकरः।।

[7] पा.सू ३-३-११२

### 7. ग्रन्थमात्रोपलब्धि

संस्कृतभाषायाः लोके व्यवहारार्थं विनियोगोऽद्यतन कालेऽतिविरलतया वर्तते। अत एतेषां जीवनं ग्रन्थमात्रसीमितं सञ्जातम्। प्राक्तनकाले लौकिकव्यवहारे एतेषां प्रयोगः कियानस्तीति सम्भावयितुं न पारयामः इति ग्रन्थमात्रोपजीविन एते न्यायाः।।

### 8. सकलजनसाधारण्यम्

दैनन्दिनव्यवहारेऽस्मद् दृष्टिपथमागच्छतः दृष्टान्तानेव स्वीकृत्य न्यायाः प्रवर्तन्ते। यद्यपि प्रसिद्धदृष्टान्तः स्वीक्रियते तत्तदर्थस्पष्टीकरणाय प्रवृत्तस्य दृष्टान्तस्यापि पुनः दृष्टान्तावसरः स्यादितिन्यायेषु विषये जनसामान्यपरिचितः एव भवति।

### 9. अनुभवपूर्वकत्वम्

सामान्यतः न्यायाः लोके यस्य कस्याप्यनुभवम्, इतरेषां प्रवृत्तिविलक्षणत्वं वा पुरस्कृत्य व्याप्ता भवन्ति। यदा लोकरीतेर्भिन्नतया, एकं नूतनमनुभवं कश्चन जनः प्राप्नोति, स च तमनुभवं लोके प्रथयति। लोके प्रथितस्सोनुभवोऽनन्तरकाले न्यायत्वं गच्छति।। यथा रज्जुसर्पन्यायः, मरुमरीचिकान्यायः, खलेकपोतन्याय इत्यादयः।

### 10. संप्रदायद्योतकत्वम्

न्यायाः मानवानामाचारव्यवहाराणां सम्प्रदायानां च द्योतकाः। निगूढविषयाः, अतिसूक्ष्म-धर्मविशेषाऽपि अस्मत् प्राचीनैः न्यायेषूपनिबद्धाः यथा अरुन्धतीदर्शनन्यायः, शंखन्यायः, द्रविडप्राणायामन्यायः इत्यादयः।

### 11. प्राचुर्यम्

यस्मिन् कस्मिन् सन्दर्भे केनचिदुक्तं विषयनिवेदकवाक्यं पुनः पुनः प्रजानां हृदयेषु शास्त्रेषु वा उपनिबद्धः न्यायत्वेन परिणमते इति प्राचुर्यमपि लक्षणं भवति। एवं प्रकारेण लौकिकन्यायानां लक्षणानि बहुधा वर्णयितुं शक्यन्ते। तथापि सामान्यतो न्यायलक्षणं विवृतमिति उपर्युक्तलक्षणैः तेषां स्वरूपस्वभावादिकं समग्रतया ज्ञातुं शक्यत इति इदानीं न्यायप्रयोजनस्थापनायोद्यम्यते।।

### उपसंहार

संस्कृतवाङ्मये न्यायानां विनियोगस्सर्वत्र दृश्यन्ते। रामायणादिकाव्येषु, पुराणादिषु, शास्त्रेषु चान्यान्यरचनारीतिषु सर्वत्रापि न्यायाः यथावसरं प्रयुक्ताः। एतानियत्तयासङ्ख्यातुं न शक्नुमः। विचित्रभावोपेताः बहुविषयद्योतकान्यायश्च अनेके अत्रोपलभ्यन्ते। विषयभेदेन न्यायान् वर्गीकर्तुमत्रैकः क्रम आश्रीयते। स्थूलतया न्यायाः द्विप्रकारकाः। लौकिकन्यायाः शास्त्रीयन्यायाः चेति। वर्गीकरणेऽस्मिन् को वा हेतुरित्युक्ते तदित्थं वर्तते। अत्र लोकमात्रप्रयुक्ताः लौकिकन्यायाः शास्त्रमात्रप्रयुक्ताः शास्त्रीयन्यायाः इति चेन्न।

लोकव्यवहारे लब्धान् काञ्चनानुभवानाधारी-कृत्योत्पन्नाः न्यायाः लौकिकन्यायाः इति, शास्त्रपरिभाषामनुसृत्य निबद्धाः शास्त्रीयन्यायाः इति च कथ्यन्ते। लौकिकन्यायाः शास्त्रेषु तत्तद्विषयसमर्थने विवरणाय वा लौकिकप्रसङ्गेष्वपि प्रयुज्यन्ते अतो लौकिकन्यायानां शास्त्रे स्वीकरणं नास्तीति न वक्तव्यम्। शास्त्रीयन्यायानां तु लोके प्रयोगो नास्ति। यतस्तेषांशास्त्रपरिभाषाश्रितत्वात्, महता कष्टेन तदर्थावगमात्, लोके प्रयोगो फला-भावाच्च। एवं प्रसिद्धिम्, प्रयोजनं चानुसृत्यैवात्र न्यायेषु लौकिक-शास्त्रीयरूपेण विभागः कृतः।। लौकिकन्यायाः लोकप्रसिद्धिमनुसृत्य बहुधा विभज्यते।

### उपयुक्तग्रन्थसूची


1. लौकिकन्यायसाहस्री, वी.के.दलाई, प्रतिभा प्रकाशन, नई दिल्ली,२०११.
2. लौकिकन्याय शास्त्रार्थ कला, वेणिमाधवशास्त्री, जयकृष्ण दास् पब्लिकेषन्स्, वारणासी, १९३९.
3. लौकिकन्यायकोशः, पि.जि.लाल्ये, भारतीय कला प्रकाशन, नई दिल्ली, २००६.

4. लौकिकन्यायाञ्जलिः, जि.ए.जाकोब, पांडुरङ्ग जवाजि पब्लिकेषन्स्, Bombay, १९२५.
5. लौकिकन्याय संग्रहः, रघुनाथवर्मा, इन्टेल् लौब्ररी सेन्टर्, वारणासि, १९५८.
6. न्यायोक्तिकोशः, छविनाथमिश्रः, अजन्तपब्लिकेषन्स्, नई दिल्ली, १९७८.